॥ ओं नमो भगवते सामवेदाय ॥

# संयोगश्रृंखलानाम
# सामवेदीय तिसृषु शिक्षासु
# द्वितीया गौतमीया शिक्षा
## प्रथमः प्रपाठके

### प्रथमःखण्डः

अथ त्रयस्त्रिँशद् व्यञ्जनानि भवन्ति,
स्पर्शान्तस्थोष्माणश्चेति ॥
तत्र ककारादयो मकारान्तास्स्पर्शाःपञ्चविंशतिः,
चत्वारोऽन्तस्था स्ते य र ल वाः ॥
चत्वारश्चोष्माण स्ते ह श ष साश्चेति ॥
अनेकं व्यञ्जनं यत्रोपर्युपरि संयुक्तन्त-त्संयोग संज्ञं भवति, अस्वरञ्च पूर्वमक्षरं ॥
अथ त्रिविध स्संयोगपिण्डो भवति,
अयस्पिण्डो, दारुपिण्डस्तथोर्णापिण्डश्चे ि॥
यमसहित मयस्पिण्डन्दारुपिण्डमन्तस्थै र्युक्तं ।।
यमान्तस्थवर्जन्तूर्णापिण्डमिति ।
अन्तस्थ यमं संयोगे विशेषोनोपलभ्यत,
इत्यशरीरं यमं विद्यात्, अन्तस्थः पिण्डनायकः ॥

**इति प्रथमः खण्डः**

### द्वितीयः खण्डः

अथानन्त्या विंशति र्भवन्ति ते क च ट त पाः,
ख छ ठ थ फा घ झ ढ ध भा श्चेति ।
अथान्त्याः पञ्च-ते, ङ ञ ण न माश्चेति ।
अथानन्त्या श्चत्वार स्ते सयमाः ते कुं खुं गुं घुं इति ।
अनन्त्यान्त्य संयोगेऽनन्त्यपूर्वेऽनन्त्योत्तरे
व्यवधानवर्जिते तत्र यमावर्तन्ते न सँशय इति ।

**इति द्वितीयः खण्डः**

## तृतीय खण्डः

अथ सर्वेषां व्यञ्जनानां द्विर्भावो भवति,
द्वादशाक्षरवर्जं, ते, ख छ ठ थ फा घ झ, ढ ध भा र ह या श्चेति।

हकारस्यैके मन्यन्ते यदि भवति र ह यो र्मध्ये ॥

सर्वत्र स्वारात्संयोगादीः क्रामति रेफ हकार वर्जं।
ताभ्यां परं क्रामति।
न क्रमते परमुपध्मानीयानुस्वारजिह्वामूलीयानां
विसर्जनीयपरञ्चक्षःत्सप्रत्ययेक्षःत्सप्रत्यये ॥

इति तृतीयः खण्डः

## चतुर्थः खण्डः

अथ द्व्यक्षराणामुदाहरणं द्वौ तकारौ
तस्मा त्तेसत्तमा यथा प्रियवेंत्तेव भवति।
द्वौ नकारौ यन्नमस्यन्ति शन्नोदेवीरुन्नयामि।
द्वौ जकारौ यज्जायथाः, उज्जिहानाः अस्थिमज्जेति।
द्वौमकोरौ यम्मित्रं, तम्मन्ये, शुम्मघवन्।
द्वौ चकारौ यदद्यकश्च परमाच्चित्।
यथाशु भार्गवे साग्नि उच्चाते जातमन्ध ३ साः।
द्वौ सकारौ यस्सुक्षिति।
पुनाना स्सोऽग्नि स्समिधा।
द्वौ यकारौ यथोभय्यो धानंजय्यः।
सह रय्या निवर्तस्वेति। द्वौ दकारौ यद्दूरे
यद्दिधृक्षे, मोद्दालको हारुणिः।
द्वौ लकारौ स्वर्गाल्लोकादूर्ध्वमुल्लिखेर्दोभिरेवैनल्लोकै ः।
द्वौ ङकारावृश्यव्रते ऋश्यास इन्द्र भुङिङति मघवन्निन्द्र
भुङिङति भुङिङति प्र भु ङिङतीन्द्रस्तसरपू ता २३४५ एवमादीनि ॥
इति चतुर्थः खण्डः

## पञ्चमः खण्डः

चकार छकारा विन्द्रमच्छेति तकार थकारौ,
वेत्थाहीति, दकार धकारौ शुद्धमिति।

बकार भकारावब्भक्ष स्तृतीयमिति।

यण्वे॒रेफ षकारौ अर्षा सोमद्युमत्तमऽ२। बर्हिरिति रहौ, विह्वु तमिति हरौ।
दर्शेति रशौ, स्पर्शेति सपौ, दयौ देवस्थाने द्यौरकान्
भूमि रतनत्समुद्रँ समचूकुपत्-इट् इडा ऽ२३४५ एवमादीनि॥

## इति पञ्चमः खण्डः

## षष्ठ खण्डः

यानिचान्यानि यथाकरणे सर्पसाम, धर्मरोचन-
अभीवर्त्तेषु संयमन्नव्यायमन्वियम न्नसमायमन्
उद्यल्लोकान रोचयोहो इ।

तंवोऽ ३ दाऽ ३ स्मामृतीषहोवायलवै॒
र्द्धि र्भावस्तै पूवः सानुनासिकस्तुल्य॒
स्थान करणपरे क्रम प्रतिषेधः क्रम प्रतिषेधः॥

## इति षष्ठ खण्डः

## सप्तमः खण्डः

अथ त्र्यक्षराणामुदाहरणं।
अक्षरमिति ककाषाः, तमृभ्वसं॒ब भवाः।

यच्छि क्षसि, च च छाः त्वामिद्धिदद धा,
त्रैशोके॒शशवाः विश्वोहाइ।
ब्रह्मेति॒हममाः, विष्णुरितिषषणाः।
पृश्निरिति॒शशनाः। सृप्रकर स्नमूतय इति॒ससनाः।
सार्वकामिके ननकाः सर्वान्कामानशीमहि ऽ २३४५ एवमादीनि॥

## इति सप्तमः खण्डः

## अष्टम खण्डः

आम्रे ̱म स राः, दीर्धे ̱र ग घाः,

पादमध्ये द ध याः, पादोपान्तीये ̱न न ताः,

गौशृंगे ̱ततसाः, तरणिरित्सिषासति ॥

षट्सु ̱ट ट साः खङ्गड ड गाः ।

कुब्जं ̱बबजाः, वज्रं ̱ज ज राः, ददरावरुणसाम्नि,

इन्दु स्समुद्रमुर्विया विभाति एवमादीनि ॥

**इति अष्टमः खण्डः**

***इति प्रथमः प्रपाठकः***

# द्वितीयः प्रपाठके

## प्रथमः खण्डः

आख्यातं ̱क ख याः र क खा, मूक्रवें, डङ्खा श्शखं ।

पत्थ्यं त थ याः, भ भ जाः शार्गे ̱हावाञ्जाता १२३४ इ ̱वियञ्जते समञ्ज ते ।

पूज्ज्यं ज ज या, दू ड् ढ यं ̱डढयाः, तुब्भ्यं व भ याः,

सन्नाषडह इति ̱न न षाः । र क का अर्क्क पुष्पे साम्नि ।

अर्क्को देवानाऽ२० परमेवियो१२ माऽ२३४५

नर्कस्य देवाः परमे वियोमऽ २३४५ -(न्)-(ए)

नेवमादीनि त्र्यक्षराणामेतदुदाहरणं यथोक्तं यथोक्तं ॥

**इति प्रथमः खण्डः**

## द्वितीयः खण्डः

अथ चतुरक्षराणामुदाहरणं स य मा यमाभ्यां,

सयमाँ स्तावत्, यथाग्निरिति द्वौ गकारौ यमनकारौ ।

यज्ञ इति द्वौ जकारौ यम मकारौ, युनज्मित इति द्वौ जकारौ यम मकारौ ।

विद्माहित्वेति द्वौ दकारौ यम मकारौ, समन्ते द ध य म मकाराः,

भरामेध्मं कृणवामाहवीँ ̱षिताइ ।

गृभ्णत इति ब भ य म णकाराः उन्मृद्नीतानिति द द य म नकाराः
सगिद्मेति ड ढ य म मकाराः, पाप्मति प पयम मकाराः ।
विलम्ब सौपर्णे तत यम नकारा इति-
अस्यप्रत्नामनुद्युतमीयइयाहाइ एवमादीनि ।

## इति द्वितीयः खण्डः

## तृतीयः खण्डः

अथ यम वर्जितानां यथा उदङ्ङन्यग्वेति ङङनयाः ।
कार्ष्मन्वाजीति र ष ष माः, यद्वीडाविन्द्रयत्स्थिर इति त त स थाः ।
चन्द्रमा अप्स्वन्तरेति प प सवाः,
हारायणे ग ग ध याः, शग्ध्यूष्वौहो १२ इशचीपताइ ।
कृत्स्नमिति त त स नाः
पाङ्ङत्किरिति ङ ङ क ताः । स्थिरणस्नूमिति प प सनाः ।
कण्व रथन्तरे ज जयाः
माज्जर्य मानस्सुहस्तिया एवमादीनि ॥

## इति तृतीयः खण्डः

## चतुर्थः खण्डः

प्रेङ्खाँस्तर्ह्यारोहन्तीति रह हयाः, तथब्व्रत इति ब ब व वराः ।
सम्राज्ञीश्वश्व्रामिनि शश श्वराः ।
मत्स्येक्षेति तत सयाः । श्रौतकक्षे ननदराः ।
इन्द्रायमद्वनेसुतमिन्द्रायमोवा । अयज्ज्व्यघटत इति जजवयाः ।
कण्ठ्य इति ण ण ठा याः, वर्गान्त्य इति ननतयाः,
सुनित्सीति क क तसाः । रथन्तरे र श शयाः ।
प्राऽ २त्युवदर्श्यायतोऽ ३वाएवमादीनि ॥

## इति चतुर्थः खण्डः

## पंचमः खण्डः

अथपंचाक्षराणामुदाहरणं

यथा

ज्योतिर्गौरायस्त्र्यह इति ससतरयाः।

सङ्ङ्क्ष्णुत्येति ङङकषणाः, तस्मिन्त्स्वतन्त्रे ननतसवाः।

विश्वप्स्नया इति प प स नयाः, ङ ङ क षवाः।

पयसि अग्नेयुङ्ङ्क्ष्वाहि २३ येतवा।

पाष्ण्र्योरिति रषषणयाः। शग्ग्ध्वयाँरोह इति गगधवयाः।

पूर्णा ञ्ज्ज्व्योत्याविति ञञजवयाः।

हुवेजसिक्रयण्ण्ट्स्वतामह इति ण ण ट सवाः।

तार्क्ष्यसाम्नीति र क क ष या, तार्क्ष्यमिहा २३४५ हूवा२५ इमा २३५६ एवमादीनि॥

## इति पंचमः खण्डः

## षष्टः खण्डः

अथसयमाम्।

यथासबुध्न्न्या इति ध य म नयाः।

दुष्वप्प्न्यँस्विति प प य म नयाः।

सार्पराज्ञया इति ज ज य म ञयाः।

मङ्ङ्ण्या इति ड ड य म णयाः।

श्रुध्ये ग घ य म नयाः (पतिंवो अध्न्यानां धेनूनामिषूऽ २३ध्यसाउवा।

सक्थ्ना इति क क थ य म न काराः॥

प्राथमवृद्धिस्तुमूतय इति स स त य म नकाराः।

प्रग्ध्माखपिबासेति ग ग ध य म मकाराः।

कावे र ज ज य म मकारा इति।

अबो २३वा २३ धियग्निर्ज्मउदा २३ इतिसूरा २३ या १२ एवमादीनि॥

## इति षष्टः खण्डः

## सप्तः खण्डः

अथ षडक्षराणामुदाहरणं ।
अङ्गे चक्म्यादाविति-द्वौ ककारौ
यममकारवकारयकाराः इति ।
सत्रकात्स्त्र्यां इति ्र त त स नयाः ।
अप्साध्यग्ध्मेवाहमिति र ग ग ध य म मकाराः ॥

अथ सप्ताक्षरमेकमुदाहृतं प्रातिशाख्ये हि-तत्रहि-
(नहिन)धुञुघु ञ् क्षु ङङक्ष्क्ष्वावितिङ ङ क ष क षवाः ।
गौतमेनोकृतनसप्ताक्षरात्परस्संयोगे भवति ।
एषा सहस्त्रवर्त्मार्त्मा नानावर्तिविभूषिता ।
संयोगश्शृं खलानाम सामवेदनिबन्धनात् ।

**इत्यष्टमः खण्डः**

**इति द्वितीयः प्रपाठकः**

## ॥ इति गौतमीयशिक्षा समाप्ता ॥